# Mahavidya Kavacham 2

# મહાવિદ્યાકવચમ્ ૨

## Document Information

Text title : mahAvidyAkavacham 2

File name : mahAvidyAkavacham2.itx

Category : devii, dashamahAvidyA, kavacha, devI

Location : doc_devii

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com, NA

Description/comments : From Durlabh Stotrani. muNDamAlA tantra dashama paTalah shloka 57-86

Latest update : August 17, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 7, 2020

*sanskritdocuments.org*

# મહાવિદ્યાકવચમ્ ૨

સદાશિવ ઋષિ દેવિ ઉષ્ણિક્છન્દઃ ઉદીરિતમ્ ।
વિનિયોગશ્ચ દેવેશિ સતતં મન્ત્રસિદ્ધયે ॥ ૧॥

મસ્તકં પાર્વતીપાતુ પાતુ પઞ્ચાનનપ્રિયા ।
કેશં મુખં પાતુ ચણ્ડી ભારતી રુધિરપ્રિયા ॥ ૨॥

કણ્ઠં પાતુ સ્તનં પાતુ કપાલં પાતુ ચૈવ હિ ।
કાલી કરાલવદના વિચિત્રાચિત્રઘણ્ટિની ॥ ૩॥

વક્ષઃસ્થલં નાભિમૂલં દુર્ગા ત્રિપુરસુન્દરી ।
દક્ષહસ્તં પાતુ તારા સર્વાઙ્ગી સવ્યમેવ ચ ॥ ૪॥

વિશ્વેશ્વરી પૃષ્ઠદેશં નેત્રં પાતુ મહેશ્વરી ।
હૃત્પદ્મં કાલિકા પાતુ કણ્ઠં પાતુ નભોગતમ્ ॥ ૫॥ var ઉગ્રતારા નભોગતમ્

નારાયણી ગુહ્યદેશં મેઢ્રં મેઢ્રેશ્વરી તથા ।
પાદયુગ્મં જયા પાતુ સુન્દરી ચાઙ્ગુલીષુ ચ ॥ ૬॥

ષટ્પદ્મવાસિની પાતુ સર્વપદ્મં નિરન્તરમ્ ।
ઇડા ચ પ્ઙ્ગલા પાતુ સુષુમ્ના પાતુ સર્વદા ॥ ૭॥

ધનં ધનેશ્વરી પાતુ અન્નપૂર્ણા સદાવતુ ।
રાજ્યં રાજ્યેશ્વરી પાતુ નિત્યં માં ચણ્ડિકાઽવતુ ॥ ૮॥

જીવં માં પાર્વતી સમ્પાતુ માતઙ્ગી પાતુ સર્વદા ।
છિન્ના ધૂમા ચ ભીમા ચ ભયે પાતુ જલે વને ॥ ૯॥

કૌમારી ચૈવ વારાહી નારસિંહી યશો મમ ।
પાતુ નિત્યં ભદ્રકાલી શ્મશાનાલયવાસિની ॥ ૧૦॥

ઉદરે સર્વદા પાતુ સર્વાણી સર્વમઙ્ગલા ।
જગન્માતા જયં પાતુ નિત્યં કૈલાસવાસિની ॥ ૧૧॥

શિવપ્રિયા સુતં પાતુ સુતાં પર્વતનન્દિની ।
ત્રૈલોક્યં પાતુ બગલા ભુવનં ભુવનેશ્વરી ॥ ૧૨॥

સર્વાઙ્ગં પાતુ વિજયા પાતુ નિત્યઞ્ચ પાર્વતી । var સર્વાઙ્ગં સર્વ નિલયા
ચામુણ્ડા પાતુ મે રોમકૂપં સર્વાર્થસાધિની ॥ ૧૩॥

બ્રહ્માણ્ડં મે મહાવિદ્યા પાતુ નિત્યં મનોહરા ।
લિઙ્ગં લિઙ્ગેશ્વરી પાતુ મહાપીઠે મહેશ્વરી ॥ ૧૪॥

સદાશિવપ્રિયા પાતુ નિત્યં પાતુ સુરેશ્વરી ।
ગૌરી મે સન્ધિદેશઞ્ચ પાતુ વૈ ત્રિપુરેશ્વરી ॥ ૧૫॥

સુરેશ્વરી સદા પાતુ શ્મશાને ચ શવેઽવતુ ।
કુમ્ભકે રેચકે ચૈવ પૂરકે કામમન્દિરે ॥ ૧૬॥

કામાખ્યા કામનિલયં પાતુ દુર્ગા મહેશ્વરી ।
ડાકિની કાકિની પાતુ નિત્યં ચ શાકિની તથા ॥ ૧૭॥

હાકિની લાકિની પાતુ રાકિની પાતુ સર્વદા ।
જ્વાલામુખી સદા પાતુ મુખ્યમધ્યે શિવાઽવતુ ॥ ૧૮॥

તારિણી વિભવે પાતુ ભવાની ચ ભવેઽવતુ ।
ત્રૈલોક્યમોહિની પાતુ સર્વાઙ્ગં વિજયાઽવતુ ॥ ૧૯॥

રાજકુલે મહાદ્યુતે સઙ્ગ્રામે શત્રુસઙ્કટે ।
પ્રચણ્ડા સાધકં માઞ્ચ પાતુ ભૈરવમોહિની ॥ ૨૦॥

શ્રીરાજમોહિની પાતુ રાજદ્વારે વિપત્તિષુ ।
સમ્પદ્પ્રદા ભૈરવી ચ પાતુ બાલ બલં મમ ॥ ૨૧॥

નિત્યં માં શમ્ભુવનિતા પાતુ માં ત્રિપુરાન્તકા ।

ઇત્યેવં કથિતં રહસ્યં સર્વકાલિકમ્ ॥ ૨૨॥

ભક્તિદં મુક્તિદં સૌખ્યં સર્વ સમ્પત્પ્રદાયકમ્ ।
યઃ પઠેત્ પ્રાતરુત્થાય સાધકેન્દ્રો ભવેદ્ભુવિ ॥ ૨૩॥

કુજવારે ચતુર્દશ્યામમાયાં મન્દવાસરે ।
યઃ પઠેત્ માનવો ભક્ત્યા સ યાતિ શિવ મન્દિરમ્ ॥ ૨૪॥

ગુરૌ ગુરું સમભ્યર્ચ્ય યઃ પઠેત્સાધકોત્તમઃ ।

સ યાતિ ભવનં દેવ્યાઃ સત્યં સત્યં ન સંશયઃ ॥ ૨૫॥

એવં યદિ વરારોહે પઠેદ્ભક્તિ પરાયણઃ ।
મન્ત્રસિદ્ધિર્ભવેત્તસ્ય ચાચિરાન્નાત્ર સંશયઃ ॥ ૨૬॥

સત્યં લક્ષપુરશ્ચર્યાફલં પ્રાપ્ય શિવાં યજેત્ ।
રાજમાર્ગં શિવમાર્ગં પ્રાપ્ય જીવઃ શિવો ભવેત્ ॥ ૨૭॥

પઠિત્વા કવચં સ્તોત્રં મુક્તિમાપ્નોતિ નિશ્ચિતમ્ ।
પઠિત્વા કવચં સ્તોત્રં દશવિદ્યાં યજેદ્યદિ ।
વિદ્યાસિદ્ધિર્મન્ત્રસિદ્ધિર્ભવત્યેવ ન સંશયઃ ॥ ૨૮॥

તદૈવ તામ્બુલૈઃ સિદ્ધિર્જાયતે નાત્ર સંશયઃ ।
અશવસિદ્ધિશ્ચિતાસિદ્ધિર્દુર્લભા ધરણીતલે ॥ ૨૯॥

અયત્નસુભગા સિદ્ધિસ્તામ્બૂલાન્નાત્ર સંશયઃ ।
નિશામુખે નિશાયાઞ્ચ મહાકાલે નિશાન્તકે ।
પઠેદ્ભક્ત્યા મહેશાનિ ગાણપત્યં લભેત્ સઃ ॥ ૩૦॥

ઇતિ શ્રીમુણ્ડમાલાતન્ત્રે દશમપટલે પાર્વતીશ્વરસંવાદે મન્ત્રસિદ્ધિસ્તોત્રં કવચં અથવા મહાવિદ્યાકવચં સમ્પૂર્ણમ્ ॥

મુણ્ડમાલાતન્ત્રે દશમઃ પટલઃ શ્લોકાઃ ૫૭-૮૬

Proofread by Aruna Narayanan narayanan.aruna at gmail.com, NA

---

*Mahavidya Kavacham 2*

pdf was typeset on August 7, 2020

Please send corrections to *sanskrit@cheerful.com*